# Rama Paduka Mahamantrah

# રામચન્દ્રપાદુકામહામન્ત્રઃ

## Document Information

Text title : Ramachandra Paduka Mantra

File name : rAmachandrapAdukAmantra.itx

Category : raama, mantra

Location : doc_raama

Transliterated by : Mandar Kulkarni

Proofread by : Mandar Kulkarni

Latest update : May 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

# રામચન્દ્રપાદુકામહામન્ત્રઃ

અસ્ય શ્રીરામપાદુકામહામન્ત્રસ્ય નારાયણાય ઋષયે નમઃ શિરસિ ।
અનુષ્ટુભે છન્દસે નમઃ મુખે ।
શ્રી પાદુકાખ્ય પરમાત્મને દેવતાયૈ નમઃ હૃદયે ।
હંસઃ બીજાય નમઃ ગુહ્યે ।
સોઽહં શક્તયે નમઃ પાદયોઃ ।
ઐં કીલકાય નમઃ નાભૌ ।
શ્રીરામચન્દ્રપ્રસાદસિદ્ધ્યર્થે શ્રીગુરોરાજ્ઞયા જપે વિનિયોગાય નમઃ ।
સર્વાઙ્ગે કરન્યાસઃ / હૃદયાદિ ન્યાસઃ ।
હંસાં અઙ્ગુષ્ઠાભ્યાં નમઃ હૃદયાય નમઃ ।
હંસીં તર્જનીભ્યાં નમઃ શિરસે સ્વાહા ।
હંસૂં મધ્યમાભ્યાં નમઃ શિખાયૈ વષટ્ ।
હંસૈં અનામિકાભ્યાં નમઃ કવચાય હું ।
હંસૌં કનિષ્ઠિકાભ્યાં નમઃ નેત્રત્રયાય વૌષટ્ ।
હંસઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ -
મુક્તા-વિદ્રુમ-હેમ-હીર-ઘટિતે શ્રીપીઠરાજોત્તમે ।
દીવ્યન્તૌ વિલસત્-નિસર્ગ-પરમાનન્દપ્રકાશાદ્ભુતે ॥

વિસ્ફૂર્જત્- તરુણાર્કકોટિ કિરણવ્યાકીર્ણ શુદ્ધામ્બરે ।
સત્-ચિત્-રૂપ-ઘને ઘનાઘ-તિમિર-સ્તોમૈક-નાશોદ્ભટે ॥

ભક્તાનાં શિરસિ પ્રકાશ પટલી ફુલ્લત્-સહસ્રચ્છદે ।
પદ્મેઽખણ્ડચન્દ્રમણ્ડલગતે શ્રીહંસપીઠોત્તમે ॥

તિષ્ઠન્ત્યૌ નિજપૂર્ણધામનિ સદા કલ્યાણદિવ્યાસ્પદે ।
માયા-મોહ-મદાન્ધકારશમને સેવ્યે વિભોઃ પાદુકે ॥

પઞ્ચપૂજાઃ -
લં પૃથ્વ્યાત્મને ગન્ધં કલ્પયામિ નમઃ ।
હં આકાશાત્મને પુષ્પં કલ્પયામિ નમઃ ।
યં વાયવ્યાત્મને ધૂપં કલ્પયામિ નમઃ ।
રં વહ્ન્યાત્મને દીપં કલ્પયામિ નમઃ ।
વં અમૃતાત્મને નૈવેદ્યં કલ્પયામિ નમઃ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારાન્ કલ્પયામિ નમઃ ।
ૐ ઐં હ્રીં શ્રીં હ્સ્ખ્ફ્રેં હસક્ષમલવરયૂમ્ ।
ૐ ઐં હ્રીં શ્રીં સ્હ્ખ્ફ્રેં સહક્ષમલવરયીમ્ ।
રાં રામચન્દ્રસહજાનન્દિની
રામચન્દ્રસહજાનન્દિની શ્રીપાદુકાં પૂજયામિ નમઃ ।
રામચન્દ્રસહ indicates Bharata and that
which gives him bliss is rAmachandrasahajAnandinI
the padukas.

Follow this text by rAmachandrapAdukArchanaM.

Proofread by Mandar Kulkarni

*Rama Paduka Mahamantrah*

pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*